# Shakti Stotram Madakritam

# મદકૃતાં શક્તિસ્તોત્રમ્

## Document Information

Text title : Shakti Stotram Madakritam

File name : shaktistotrammadakRRitAM.itx

Category : devii, mudgalapurANa, devI, stotra

Location : doc_devii

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 44 | 2.44. 20-30||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# મદકૃતાં શક્તિસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
મદ ઉવાચ ।
નમામિ ત્વાં મહામાયે સર્વશક્તિસમન્વિતામ્ ।
ત્વદાધારમિદં સર્વં શક્તિયુક્તં પ્રવર્તતે ॥ ૨૦॥
અનાદિમપ્રમેયાં ત્વાં ન જાનન્તિ મહર્ષયઃ ।
વેદાન્તવેદ્યરૂપાં વૈ નમામિ પરમેશ્વરીમ્ ॥ ૨૧॥
નાનાભેદકરીં દેવીં નાનાભેદવિવર્જિતામ્ ।
ભેદાભેદમયીં ત્વાઽહં નમામિ સકલેશ્વરીમ્ ॥ ૨૨॥
પાર્વતીં દક્ષપુત્રીં ચ હિમાચલસુતાં તથા ।
સમુદ્રતનયાં લક્ષ્મીં સાવિત્રીં ત્વાં નમામ્યહમ્ ॥ ૨૩॥
ત્વાં સ્વાહાં ત્વાં સ્વધાં ચૈવ વષટ્કારાત્મિકાં શિવામ્ ।
બુદ્ધિરૂપાં દેવમયીં જ્ઞાનરૂપાં નમામ્યહમ્ ॥ ૨૪॥
સિદ્ધિદાં સર્વકાર્યેષુ સિદ્ધિરૂપાં તપસ્વિનીમ્ ।
યોગિનીં યોગદાત્રીં વૈ યોગેશીં ત્વાં નમામ્યહમ્ ॥ ૨૫॥
ત્વાં સ્તોતું ન સમર્થા યે મુનયો વેદવાદિનઃ ।
દેવાઃ સ્કન્દશ્ચ શેષશ્ચ તત્રાઽહં સ્તૌમિ કિં પરામ્ ॥ ૨૬॥
ધન્યૌ મે પિતરૌ જ્ઞાનં તપો વિદ્યાદિકં ચ યત્ ।
યત્ત્વાઙ્ઘ્રિયુગં દૃષ્ટં સર્વદુઃખવિમોચનમ્ ॥ ૨૭॥
ઇત્યુક્ત્વા સંસ્થિતસ્તૂષ્ણીં ભાવેન સ મદાસુરઃ ।
તમુવાચ મહાશક્તિર્ભક્તિભાવેન યન્ત્રિતા ॥ ૨૮॥
(ફલશ્રુતિઃ)
શક્તિરુવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભવિષ્યતિ મહાભાગ સર્વકામફલપ્રદમ્ ॥ ૨૯॥
ધર્માર્થકામમોક્ષાણાં સાધનં પ્રભવિષ્યતિ ।

પઠતાં શૃણ્વતાં સર્વં સુખદં ચ મહાસુર ॥ ૩૦॥

ઇતિ મદકૃતાં શક્તિસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૪૪ । ૨.૪૪। ૨૦-૩૦॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 44 . 2.44. 20-30..

Proofread by Yash Khasbage, Preeti Bhandare

*Shakti Stotram Madakritam*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*